# अभिहितान्वयवादः

– **मणिद्राविडः**,

पूर्वमीमांसाध्यापकः,

मद्रपुरीसंस्कृतमहाविद्यालयः, मैलापूर् , चेन्नै - 4.

**भूमिका**

पूर्वमीमांसाशास्त्रं **भगवता जैमिनिना** 'अथातो धर्मजिज्ञासा' (जै.सू. १।१।१) इत्यारभ्य सूत्ररूपेण प्रणीतम्। वेदवाक्यार्थविचारशास्त्रं तत्। अत एव वाक्यशास्त्रमित्यपि तत् शास्त्रं प्रसिद्धम्। तत्र च वेदवाक्यार्थनिर्णयोपयोगिनो न्यायाः सूत्रैः संग्रथिताः, येषां परिज्ञानेनैव वाक्यतात्पर्यावगमः संदिग्धस्थले सुलभो भवति। तेषां सूत्राणाम् **आचार्येण शबरस्वामिना** भाष्यं विरचितम्। शाबरभाष्यम् **आचार्येण कुमारिलभट्टेन, प्रभाकरमिश्रेण** च व्याख्यातम्। तयोः उभयोः व्याख्यानयोः अभिप्रायभेदः बहुधा उपलभ्यते। इत्थं कुमारिलभट्ट-प्रभाकरमिश्राभ्यां प्रवर्तितं मीमांसाशास्त्रस्य प्रस्थानद्वयं भाट्टप्रस्थानं प्राभाकरप्रस्थानमिति तत्तन्नाम्नैव प्रसिद्धिं गतम्।

**अन्विताभिधानवादः अभिहितान्वयवादश्च** शाब्दबोधविषये अनयोः प्रस्थानयोः मतभेदस्य विषयः । शाब्दव्यवहारे श्रोतुः प्रथमं पदानां ज्ञानम् , ततश्च शक्तिज्ञानवतः तस्य पदार्थानामुपस्थितिः, ततः आकाङ्क्षादिसहकारेण वाक्यार्थबोधः इति क्रमः सर्वानुभवसिद्धः। अयं वाक्यार्थबोध एव वाक्यप्रयोगस्योद्देश्यभूतः प्रधानम्। वाक्यं हि विशिष्टार्थप्रतिपत्तिपरतया लोके प्रयुज्यमानं दृश्यते, न केवलं पदार्थप्रतिपत्तिमात्रोद्देशेन। तदाहुः मण्डनमिश्राः - **विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जने** इति। पदार्थप्रतिपत्तिस्तु वाक्यार्थप्रतिपत्त्युपायतयैवोपयुज्यते। सति चैवं वाक्यप्रयोगस्योद्देश्यभूते वाक्यार्थबोधे किं वाक्यघटकपदानां कारणत्वम् , उत तदुपस्थापितानां पदार्थानामिति विचारो ग्रन्थेषूपलभ्यमानः अभिहितान्वयवादमाश्रित्येह प्रस्तूयते।

तत्र पदज्ञानस्य पदार्थोपस्थितौ, तद्वारा वाक्यार्थबोधे च कारणत्वमिच्छन्ति **अन्विताभिधानवादिनः।** पदानां ज्ञानं पदार्थोपस्थितावेव कारणम् , न वाक्यार्थबोधे। वाक्यार्थबोधे तु आकाङ्क्षादिसहकारेण पदार्थोपस्थितिः, पदोपस्थापितपदार्था एव वा कारणमिति **अभिहितान्वयवादिनः।**

वाक्यार्थबोधे पदार्थानां यः परस्परसंसर्गो भासते, स एव पदार्थोपस्थित्यपेक्षया तत्र विशेषः। तस्य च पूर्वमज्ञातत्वात् तद्विषयकत्वेन वाक्यार्थबोधस्य प्रमात्वमिति स्थितिः। तस्य च संसर्गस्य भाने यदि पदानां ज्ञानं कारणं, तर्हि पदानां पदार्थे संसर्गांशे च शक्तिः स्वीकर्तव्या। अन्यथा केवले पदार्थे एव शक्तिस्वीकारे वाक्यार्थबोधे संसर्गभानानुपपत्तेः, वाक्यार्थबोधे भानार्थमेव तत्तदर्थे पदानां शक्तिकल्पनात्। अत एव पदानां संसर्गांशेऽपि शक्तिः स्वीक्रियते अन्विताभिधानवादे। अभिहितान्वयवादे तु पदानां संसर्गांशे शक्तिर्न स्वीकार्या, किन्तु पदानां केवले पदार्थे एव शक्तिः स्वीकर्तव्या। संसर्गांशस्तु पदार्थोपस्थितिरूपकारणादेव वाक्यार्थबोधे भासते। अतश्च पदानां शक्तिकल्पने लाघवमिति **अभिहितान्वयवादिनः।**

वाक्यार्थबोधानुकूला शक्तिः पदेषु वा कल्प्यतां, पदार्थेषु वेत्यत्र किं विनिगमकमिति प्रश्ने – क्वचित् पदानामभावेऽपि अर्थैरेव वाक्यार्थबोधजननस्यावश्यकत्वमिति निरूपयन्ति। तथाहि — येन पुरुषेण अज्ञाताश्रयं श्वेतरूपमात्रं दृष्टम् , हेषारवश्रवणेन च अज्ञातरूपविशेषः अश्वोऽनुमितः, खुरनिक्षेपशब्दश्रवणेन च अज्ञातकर्तृकं धावनमनुमितम् , अनुपलब्ध्या च तस्मिन् प्रदेशे अन्वययोग्यवस्त्वन्तरस्याभावमवगच्छतः तस्य पुरुषस्य आकाङ्क्षायोग्यतासंनिधिसहकारेण उक्तरीत्या प्रत्यक्षानुमित्यादिविषयैरर्थैः श्वेतरूप-अश्व-धावनैः 'श्वेतोऽश्वो धावती'ति वाक्यार्थधीरुदेति। न च 'श्वेतोऽश्वो धावती'ति प्रतीतेः शाब्दधीत्वे विवदितव्यम्। 'श्वेतोऽश्वो धावती'ति विशिष्टार्थबोधस्य इन्द्रियसंनिकर्षजन्यत्वाभावेन प्रत्यक्षत्वस्य, व्याप्यस्य हेतोः पक्षधर्मताज्ञानाभावेन चानुमितित्वस्य, अनुपपत्तिज्ञानाभावेनार्थापत्तित्वस्य चासंभवे परिशेषात् शाब्दधीत्वसिद्धेः। पदज्ञानातिरिक्तस्य शाब्दधीकारणकलापस्य अर्थोपस्थितेराकाङ्क्षादेश्चाविकलत्वात्। न च तत्र पदं किंचित् श्रूयते । तस्मादत्रोपस्थिताः पदार्था एवान्वयमवगमयन्तीत्यकामेनापि अङ्गीकरणीयम्। तदाहुः वार्तिककाराः कुमारिलभट्टपादाः—

**पश्यतः श्वेतमारूपं हेषाशब्दञ्च शृण्वतः । खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः॥ दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित् ।**(श्लो. वा. वाक्याधिकरणे 358, 359) इति॥ आरूपमित्यस्य अव्यक्तरूपम् , अव्यक्ताश्रयमित्यर्थः । अतश्च अभिहितान्वयवादस्यावश्यकत्वं प्रतीयते।

**अभिहितान्वयवादे अन्ये केचन विशेषाः**

श्रोतुः पदश्रवणानन्तरं पदार्थज्ञानं स्मरणात्मकम् , पदशक्तेस्तु वाक्यार्थबोध एवोपयोगः अन्विताभिधानवादे । अभिहितान्वयवादे तु पदशक्तेः पदार्थज्ञान एवोपयोगः। श्रोतुः पदश्रवणानन्तरं पदार्थज्ञानं न स्मरणात्मकम् , किन्तु अभिधानात्मकम्। अभिधानं च तद्विषयस्तु पदार्थः अभिहित इति व्यवह्रियते। वाक्यार्थबोधस्तु पदार्थज्ञानजन्यः, अथवा अभिहितपदार्थजन्य इति तदनुकूला शक्तिः पदार्थनिष्ठैव।

न चैवमूहादिस्थले पदाध्याहारनियमो न स्यात् , पदज्ञानाभावेऽपि अर्थज्ञानेन शाब्दबोधसंभवादिति वाच्यम्। प्रमाणान्तरेणोपस्थितैरर्थैः शब्दाभिहितपदार्थसहकारेण न शाब्दबोधः न जन्यते, 'शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यत' इति न्यायात्। अत एव 'द्वारम्' इत्याद्युच्चारणे वाक्यस्य पूरणाय शब्दाध्याहार एव स्वीक्रियते भाट्टैः।

अभिहितान्वयवादे च वाक्यार्थस्य वाक्यघटकपदलक्ष्यत्वमभिमतम्। **न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः। वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिः॥** इति वचनात्। लक्षणा चेयं वाच्यार्थज्ञानजन्यार्थज्ञानरूपा विवक्षिता, शक्यसंबन्धरूपा। **अभिधेयाविनाभूते प्रतीतिर्लक्षणेष्यते** इति तन्त्रवार्तिकात्। अत्र लक्ष्यार्थस्य अभिधेयार्थसंबन्धित्वरूपापरित्यागेन प्रतीतिरिति प्रदर्शनार्था अभिधेयाविनाभूतत्वोक्तिः, न तु तस्य अविनाभावरूपशक्यसंबन्धप्रदर्शनार्थेति न्यायसुधायां व्याख्यातम्। तथा च वाक्यार्थस्य पदवाच्यार्थज्ञानजन्यज्ञानविषयत्वात् लक्ष्यमाणत्वोक्तिरविरुद्धा।

अन्विताभिधानवादे लाक्षणिकपदं न वाक्यार्थबोधजनकम् , किन्तु तत्समभिव्याहृतं शक्तं पदान्तरमेव। तथाच सर्वपदलाक्षणिकवाक्ये 'कुमतिः पशु'रित्यादौ वाक्यार्थबोधानुपपत्तिः। अभिहितान्वयवादे तु वाक्यार्थबोधजननानुकूलशक्तेः पदार्थनिष्ठत्वात् नानुपपत्तिः। शक्यलक्ष्यार्थविभागस्तु साक्षात्पदजन्यज्ञानविषयस्य शक्यत्वम् , पदवाच्यार्थज्ञानजन्यज्ञानविषयस्य तु लक्ष्यत्वमिति सुकरः।

**अभिहितान्वयवादे सूत्रभाष्यानुगुण्यम्**

पूर्वमीमांसासूत्रकारोऽपि **अर्थस्य तन्निमित्तत्वात्** (१.१.१५) इति स्पष्टमेव पदार्थस्य वाक्यार्थावगमहेतुतामाचष्टे। शाबरभाष्यमपि— "**पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अवगतास्सन्तः वाक्यार्थमवगमयन्ति**" (शा .भा.1-1-25) इति स्पष्टम् अभिहितान्वयवादं समर्थयत् प्रतीयते।

**अन्विताभिधानवादखण्डने युक्तिविशेषः**

किञ्च 'अतिशोभनो राजपुरुषः' इत्यादौ समस्तपदघटितवाक्ये समस्तपदार्थयोः अन्वयानुपपत्तिरन्विताभिधानवादे। अत्र वाक्यार्थबोधे अतिशयसंबन्धः शोभनत्वे, राजसंबन्धः पुरुषे, ततः अतिशयान्वितशोभनगुणस्य राजसंबन्धिपुरुषे संसर्गो भासते। समासे हि न पृथक् शक्तिः स्वीक्रियते। किन्तु समासघटकपदार्थयोः पूर्वं परस्परान्वयः, पश्चाद् अन्वितस्य विशिष्टस्य इतरपदार्थान्वयः तत्रेष्यते। पदानां पदान्तरोपस्थापितार्थान्विते स्वार्थे शक्तिः इति अन्विताभिधानवादे सिद्धान्तः। अतिशयान्वितशोभनगुणस्य राजान्वितपुरुषेऽन्वये न शोभनपदस्य न वा पुरुषपदस्य शक्तिरस्ति। समासघटकयोः शोभन-पुरुषपदयोः केवलयोः शोभन-पुरुषयोः पदार्थान्तरान्वयबोधने शक्तिरस्ति, न तु इतरान्वितयोस्तयोरन्वयबोधने। तेन पदशक्त्या राजसंबन्धः पुरुषे, अतिशयसंबन्धः शोभनत्वे च भासतां नाम। अतिशयान्वितशोभनगुणस्य राजसंबन्धिपुरुषे संसर्गो कथं वाक्यार्थबोधे पदशक्त्या भासेत? अतः अतिशयान्वितशोभनगुणस्य राजसंबन्धिपुरुषे संसर्गमभिधातुमत्र कस्यापि पदस्य शक्तिः नास्ति। अतः तद्बोधः पदार्थनिबन्धन एव स्वीकार्य इति अभिहितान्वयवादः श्रेयानिति।